National Journal of
Hindi & Sanskrit Research

**ISSN: 2454-9177**
NJHSR 2026; 1(67): 56-58
© 2026 NJHSR
www.sanskritarticle.com

**Pabitra Barman**
Research Scholar, Ph.D,
Dept.of Research and Publication,
National Sanskrit University,
Tirupati, A.P

**Correspondence:**
**Pabitra Barman**
Research Scholar, Ph.D,
Dept.of Research and Publication,
National Sanskrit University,
Tirupati, A.P

# इन्द्रियमनादितत्त्वेभ्यः आत्मनः परत्वनिरुपणम्

**Pabitra Barman**

### ❖ उपोद्घात

सूक्ष्मत्वात्प्रकाशकत्वाद्व्यापकत्वाद्व्यापकत्वादन्तःस्थत्वाच्च प्रकृष्टान्याहुः पण्डिताः श्रुतयो वा। तथेन्द्रियेभ्यः परं मनः संकल्पविकल्पात्मकं तत्प्रवर्तकत्वात्। तथा मनसस्तु परा बुद्धिरध्यवसायात्मिका। अध्यवसायो हि निश्चयस्तत्पूर्वकएव संकल्पादिर्मनोधर्मः। यस्तु बुद्धेः परतस्तद्भासकत्वेवनावस्थितः यं देहिनमिन्द्रियादिभिराश्रयैर्युक्तः कामो ज्ञानावरणद्वारा मोहयतीत्युक्तं स बुद्धेर्द्रष्टा परं आत्मासु एष इह प्रविष्टः इतिवद्व्यवहितस्यापि देहिनस्तदा परामर्शः। अत्रार्थे श्रुतिःइन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः। मनसस्तु परा बुद्धिर्बुद्धेरात्मा महान्परः। महतः परमव्यक्तमव्यक्तात्पुरुषः परः। पुरुषान्न परं किंचित्सा काष्ठा सा परा गतिः।। इति। अत्रात्मनः परत्वस्यैव वाक्यतात्पर्यविषयत्वादिन्द्रि-यादिपरत्वस्याविवक्षितत्वात्। इन्द्रियेभ्यः परा ह्यर्थाः इति स्थानेऽर्थेभ्यः पराणीन्द्रियाणीति विवक्षाभेदेन भगवदुक्तं न विरुध्यते। बुद्धेरस्मदादिव्यष्टिबुद्धेः सकाशान्महानात्मा समष्टिबुद्धिरूपः परःमनो महान्मतिर्ब्रह्मा पूर्बुद्धिः ख्यातिरीश्वरः इति वायुपुराणवचनात्। महतो हैरण्यगर्भ्या बुद्धेः परमव्यक्तमव्याकृतं सर्वजगद्बीजं मायाख्यंमायां तु प्रकृतिं विद्यात् इति श्रुतेःतद्धेदं तर्ह्यव्याकृतमासीत् इति च। अव्यक्तात्सकाशात्सकलजडवर्गप्रकाशकः पुरुषः पूर्ण आत्मापरः तस्मादपि कश्चिदन्यः परः स्यादित्यत आह पुरुषान्न परं किंचिदिति। कुत एवं। यस्मात् सा काष्ठा समाप्तिः। सर्वाधिष्ठानत्वात्सा परा गतिः।सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदम् इत्यादिश्रुतिप्रसिद्धा परा गतिरपि सैवेत्यर्थः। तदेतत्सर्वं यो बुद्धेः परतस्तु स इत्यनेनोक्तम्।

तद्विषये भगवता श्रीकृष्णेन श्रीमद्भगवतगीतायाम् उक्तम् –

**" इन्द्रियाणि पराण्याहुरिन्द्रियेभ्यः परं मनः।**

**मनसस्तु परा बुद्धिर्यो बुद्धेः परतस्तु सः"।।**[1]

भगवता शङ्कराचार्येन श्लोकस्यास्य भाष्यः कृतम् - इन्द्रियाणि श्रोत्रादीनि पञ्च देहं स्थूलं बाह्यं परिच्छिन्नं च अपेक्ष्य सौक्ष्म्यान्तरत्वव्यापित्वाद्यपेक्षया पराणि प्रकृष्टानि आहुः पण्डिताः। तथा इन्द्रियेभ्यः परं मनः संकल्पविकल्पात्मकम्। तथा मनसः तु परा बुद्धिः निश्चयात्मिका। तथा यः सर्वदृश्येभ्यः बुद्ध्यन्तेभ्यः आभ्यन्तरः यं देहिनम् इन्द्रियादिभिः आश्रयैः युक्तः कामः ज्ञानावरणद्वारेण मोहयति इत्युक्तम्। बुद्धेः परतस्तु सः सः बुद्धेः द्रष्टा परमात्मा।।

कठोपनिषदि अपि उल्लिखितम् –

**"इंद्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः ।**

**मनसस्तु परा बुद्धिर्बुद्धेरात्मा महान्परः ।।**[2]**"**

### ❖ आत्मार्कबोधे इन्द्रिय-प्राण-आत्मनः प्रियत्वक्रमः :

अद्वैतवेदान्तपरम्परायां आत्मा सर्वप्रियः, सर्वानुभवसाक्षी च इति सिद्धान्तः सर्वत्र प्रतिपाद्यते। गोविन्दभट्टविरचिते आत्मार्कबोधे अपि अयं सिद्धान्तः अत्यन्तं सरलरूपेण प्रतिपादितः। तत्र जीवस्य

प्रियत्वक्रमः पुत्रात् आरभ्य शरीर, इन्द्रिय, प्राण, आत्मा च इति निर्दिष्टः। एषः क्रमः दर्शयति यत् बाह्यवस्तूनि न स्वतो प्रियाणि, किन्तु आत्मनः सम्बन्धेन एव तेषां प्रियत्वम्।

भारतीयदर्शनपरम्परायां "आत्मा" इति विषयः परमप्रधानः। उपनिषदः, भगवद्गीता, ब्रह्मसूत्राणि, शाङ्करभाष्यम् इत्यादिषु आत्मतत्त्वस्य महत्त्वं विस्तरेण प्रतिपादितम् अस्ति। **आत्मार्कबोध** ग्रन्थे गोविन्दभट्टः आत्मस्वरूपस्य बोधं सरलयुक्तिभिः साधयति। तत्र प्रियत्वस्य विश्लेषणद्वारा आत्मा सर्वाधिकप्रियः इति प्रतिपादनं कृतम्। ग्रन्थकारेण उक्तम्—

**"वित्तात् पुत्रः प्रियः, पुत्रात् पिण्डः, पिण्डात्तथेन्द्रियम्।**

**इन्द्रियेभ्यः प्रियः प्राणः, प्राणादात्मा प्रियः परः॥[3]"**

अस्य श्लोकस्य माध्यमेन मानवानां व्यवहारे दृश्यमानः प्रियत्वक्रमः आत्मतत्त्वस्य प्रमाणरूपेण उपस्थापितः। उक्तस्य श्लोकस्य दार्शनिकः, मनोवैज्ञानिकः, उपनिषदाधारितश्च विस्तृतः विवेचनात्मकः अध्ययनं प्रस्तुत्यते।

• **श्लोकस्य पदच्छेदः तथा भावार्थः**

o **पदच्छेदः -** वित्तात् = धनात् **,**पुत्रः= सन्तानः **,** प्रियः = अधिकप्रियः, पुत्रात्

=पुत्रस्य अपेक्षया **,** पिण्डः = शरीरम्, पिण्डात् = शरीरात् , इन्द्रियम् =ज्ञानेन्द्रियाणि, कर्मेन्द्रियाणि च **,** इन्द्रियेभ्यः= इन्द्रियाणामपेक्षया **,** प्रियः = श्रेष्ठप्रियः, प्राणः=जीवनशक्तिः, प्राणात् = प्राणस्यापि अपेक्षया, आत्मा=स्वस्वरूपम् ,प्रियः परः= सर्वश्रेष्ठप्रियः।

o **भावार्थः -** धनात् पुत्रः अधिकप्रियः। पुत्रात् स्वशरीरं प्रियतरम्। शरीरात् इन्द्रियाणि अधिकप्रियाणि। इन्द्रियेभ्यः प्राणः अधिकप्रियः। किन्तु प्राणादपि आत्मा सर्वाधिकप्रियः।

**➢प्रियत्वक्रमस्य दार्शनिकविवेचनम्**

**१. वित्तस्य सीमितप्रियत्वम्**

धनं जीवनोपयोगी साधनम् अस्ति। किन्तु धनस्य उपयोगः केवलं जीवननिर्वाहपर्यन्तम्। यदि पुत्रस्य रक्षणार्थं धनत्यागः आवश्यकः भवति, जनाः धनं त्यजन्ति। अतः धनं सर्वोच्चप्रियं न भवति।

**२. पुत्रस्य प्रियत्वम्**

सन्तानं स्वहृदयस्य अंशरूपेण मन्यते। माता-पितरौ पुत्रस्य सुखाय स्वधनं, स्वसम्पत्तिं, स्वजीवनस्य सुविधाश्च त्यजन्ति। तथापि यदि पुत्ररक्षणं स्वजीवनविनाशेन सम्भवति, तदा अधिकांशजनाः स्वजीवनस्य रक्षणमेव प्रथमं कुर्वन्ति। अतः शरीरं पुत्रादपि प्रियतरम्।

**३. शरीरस्य महत्त्वम्**

शरीरमेव धर्मसाधनम्—**"शरीरमाद्यं खलु धर्मसाधनम्।[4]"** रोगे, दुःखे वा जनाः शरीररक्षणाय बहु प्रयत्नं कुर्वन्ति। तथापि यदि शरीरस्य कश्चित् अवयवः सम्पूर्णशरीररक्षणार्थं त्याज्यः भवति, तं त्यजन्ति। अतः शरीरादपि इन्द्रियाणि विशेषमहत्त्वानि भवन्ति।

**४. इन्द्रियाणां श्रेष्ठता**

इन्द्रियाणि ज्ञानकर्मणोः साधनानि। विशेषतः चक्षुः, श्रोत्रम् इत्यादीनि जीवनस्य गुणवत्तां निर्धारयन्ति। अन्धत्वं, बधिरत्वं वा जनानां कृते महान् क्लेशः भवति। किन्तु यदि इन्द्रियरक्षणं प्राणहानिकरं भवति, तदा जनाः इन्द्रियत्यागमपि स्वीकुर्वन्ति। उदाहरणार्थं चिकित्सकाः रोगिणः प्राणरक्षणार्थं नेत्रं, हस्तं वा अपाकरोन्ति। अतः प्राणः इन्द्रियेभ्यः प्रियतरः।

**५. प्राणस्य महत्त्वम्**

प्राणः जीवनस्य आधारः। प्राणवियोगे शरीरम्, इन्द्रियाणि, धनं पुत्रश्च सर्वमेव निरर्थकं भवति । तथापि सुषुप्तौ प्राणः विद्यमानः भवति, किन्तु तस्य ज्ञानं न भवति। प्राणस्यापि साक्षी कश्चित् अस्ति। स एव आत्मा।

**६. आत्मा सर्वप्रियः**

आत्मा न शरीरम्, न इन्द्रियाणि, न मनः, न प्राणः। आत्मा सर्वानुभवसाक्षी, नित्यः, शुद्धः, बुद्धः, मुक्तः च । यः सर्वानुभवान् प्रकाशयति, स एव आत्मा। अतः आत्मनः कृते एव सर्वं प्रियं भवति।

➢ **उपनिषदां समर्थनम्**

अयं सिद्धान्तः बृहदारण्यकोपनिषदि स्पष्टतया प्रतिपादितः—

**"न वा अरे पत्युः कामाय पतिः प्रियः भवति, आत्मनस्तु कामाय पतिः प्रियः भवति।[5]"**

तथैव—**"आत्मनस्तु कामाय सर्वं प्रियं भवति।"**

अर्थात् कोऽपि पदार्थः स्वतो न प्रियः, किन्तु आत्मसम्बन्धेन एव प्रियत्वं लभते।

**➢मनोवैज्ञानिकदृष्ट्या विवेचनम्**

आधुनिकं मनोविज्ञानमपि आत्मरक्षणप्रवृत्तिं सर्वप्रबलां मन्यते। प्रत्येकः जीवः स्वास्तित्वरक्षणाय प्रयतते। अयं स्वाभाविकः आत्मसंरक्षणभावः वस्तुतः आत्मप्रियत्वस्य बाह्यप्रकाशः। अद्वैतवेदान्तः तु अस्यापि परं गत्वा वदति यत् यः आत्मसंरक्षणभावः दृश्यते, स देहाभिमानस्य परिणामः; वास्तविकः आत्मा तु नित्यः अविनाशी च।

**➢अद्वैतवेदान्तदृष्ट्या विश्लेषणम्**

अद्वैतवेदान्ते आत्मा न कदापि विषयः, किन्तु सर्वविषय-प्रकाशकः। शरीरम्, इन्द्रियाणि, मनः, बुद्धिः, प्राणः—एते सर्वे ज्ञेयाः। ज्ञेयानां ज्ञाता आत्मा भवति।

यदा साधकः विवेकपूर्वकं चिन्तयति—अहं न शरीरम्, अहं न इन्द्रियाणि, अहं न प्राणः, अहमेव साक्षिचैतन्यम्, तदा आत्मज्ञानस्य उदयः भवति।

**➢समकालीनप्रासङ्गिकता**

आधुनिकभौतिकवादीसमाजे धनस्य महत्त्वं अत्यधिकं दृश्यते। किन्तु संकटसमये धनं त्यक्त्वा जनाः जीवनरक्षणमेव कुर्वन्ति। तदपि आत्मानुभवस्य मूल्यं सर्वोपरि भवति। अतः आत्मार्कबोधस्य अयं सिद्धान्तः केवलं दार्शनिकः न, अपितु व्यावहारिकजीवनस्यापि महत्त्वपूर्णः मार्गदर्शकः अस्ति।

गोविन्दभट्टस्य आत्मार्कबोधे प्रतिपादितः प्रियत्वक्रमः अद्वैतवेदान्तस्य मूलसिद्धान्तस्य अत्यन्तं युक्तियुक्तं प्रतिपादनम् अस्ति। धनात् पुत्रः, पुत्रात् शरीरम्, शरीरादिन्द्रियाणि, इन्द्रियेभ्यः प्राणः, प्राणादपि आत्मा इति क्रमः दर्शयति यत् समस्तप्रियत्वस्य मूलकारणम् आत्मैवास्ति। आत्मा न केवलं जीवनस्य आधारः, अपितु सर्वानुभवस्य साक्षी, सर्वप्रियः, परमसत्यस्वरूपश्च। अतः आत्मज्ञान-मेव मानवजीवनस्य परमपुरुषार्थः इति सिद्ध्यति।

**❖ निष्कर्षः**

उपर्युल्लिखितानाम् आलोचनावसरे विस्तारितुं शक्यते यत्, मार्गभिन्नत्वे सतिमूललक्षमस्ति आत्मतत्त्वनिरुपणम् एव ।यद्यपि भगवद्गीतायाः प्रारम्भिकेषु अध्यायेषु ध्यानविधिविषये विस्तृतविमर्शः अपेक्षितुं न शक्नुमः तथापि एतेषु श्लोकेषु भगवान् आत्मसाक्षात्कारसाधनत्वेन ध्यानविधेः रूपरेखां ददाति। बाह्यजगतः वस्तूभ्यः अपेक्षया अस्माकं इन्द्रियाणि अधिकं महत्त्वपूर्णानि सन्ति। इन्द्रियाणि श्रेष्ठानि सूक्ष्मतराणि च कर्मावयवात् । मनः एव इन्द्रियाणि नियन्त्रयति इति वयं सर्वे अनुभवामः अतः अत्र मनः सूक्ष्मं इन्द्रियेभ्यः परं च । उक्तं निःसंदेहं मनसः विचरणक्षेत्रं तु अत्यन्तं विस्तृतं भवति तथापि तस्य स्वकीयाः सीमाः सन्ति वयं एकस्य पश्चात् अन्यस्य ज्ञानं प्राप्य अस्माकं मनसः सीमां वर्धयामः तथा च अस्मिन् विजयाभियाने बुद्धिः एव प्रथमतया मनसः वर्तमानज्ञानस्य सीमां लङ्घयित्वा तदर्थं नूतनानि ज्ञानराज्यानि विजयते । अस्मात् दृष्ट्या बुद्धेः व्याप्तिः अपि विस्तृता अस्ति, अतः बुद्धिः मनसः श्रेष्ठा इति उक्तम्। बुद्धेः परं यत्तत्त्वं ताम् आत्मा कथ्यते । यत् बुद्धिप्रवृत्तीनां बोधकं चैतन्यं बुद्धेरपेक्षया सूक्ष्मतरं भवितुमर्हति । उपनिषदेषु उक्तं यत् अस्मात् चैतनात्मनः परं किमपि नास्ति। ध्यानेमन शरीरं मनः बुद्धिः चेति उपाधिभिः सह स्वस्य तादात्म्यं अपसारयित्वा यथार्थस्वभावैः स्वस्य सचेतनप्रयत्नः क्रियते । एते सर्वे प्रयत्नाः तदा समाप्ताः भवन्ति यदा वयं मिथ्याविषयेभ्यः ध्यानं निष्कास्य वस्तुरहितचेतनारूपेण स्थिताः भवामः ।

**❖ परिशीलितग्रन्थसूची**

**१.**श्रीमद्भगवतगीता(श्रीकृष्णद्वैपायनवेदव्यासविरचितः); गीताप्रेस,गोरक्षपुर **–** २०२०

२.कठोपनिषद्(शाङ्करभाष्यम्) ; गीताप्रेस,गोरक्षपुर **–**२०२४

**३.**बृहदारण्यकोपनिषद्(शाङ्करभाष्यम्);गीताप्रेस,गोरक्षपुर**-**२०१९

४.**विवेक-चूडामणिः (श्रीमदाद्यश**ङ्कराचार्यविरचितः); मुनिलालः, गीताप्रेस, गोरक्षपुर **–** २०२२

**५.ईशादिनौपनिषद्(श्रीमदाद्यश**ङ्कराचार्यविरचितः); हरिकृष्णदास-गोयन्दका, गीताप्रेस,गोरक्षपुर – २०२२

**पाद टिप्पणी**

[1]श्रीमद्भगवतगीता(३.४२)

[2]कठोपनिषद्

[3]आत्मार्कबोधः

[4]कुमारसम्भवम्(५म सर्गः)

[5]बृहदारण्यकोपनिषद् – २.४.५